ॐ

ना० [illegible]नी: [illegible]

[illegible]

स्वा/अ० अमृत[illegible]न

[illegible]

[illegible] धर्मानन्द

तीर्थ [illegible]

सविधानम्पुरुषसूक्तं श्रीसूक्तञ्च

काशीस्थभारतीयशालाध्यक्ष पं० काशीनाथमिश्रानुजात्र
कर्मकाण्डाचार्येण संशोधितम् ।

प्रकाशक—फर्म बाबू बैजनाथ प्रसाद बुकसेलर,

सन् १९५५ राजादरवाजा बनारस सिटी । मूल्य =)

१ हस्तयोः पादयोर्जान्वोः कट्योर्नाभौ हृदि क्रमात्।

कण्ठे बाह्वोर्मुखे नेत्रे मूर्ध्नि वामाङ्गतो न्यसेत्॥ १॥

वृहत्पाराशरसंहितायाम्। अर्चनं सम्प्रवक्ष्यामि विष्णोरमिततेजसः॥ यत्कृत्वा मुनयः सर्वे परं निर्वाणमाप्नुयुः॥ १॥ अनुष्टुभस्य सूक्तस्य त्रिष्टुबन्तस्य देवता॥ पुरुषो यो जगद्बीजं ऋषिर्नारायणः स्मृतः॥ २॥ प्रथमां विन्यसेद्वामे द्वितीयां दक्षिणे करे॥ तृतीयां वामपादे च चतुर्थीं दक्षिणे न्यसेत्॥ ३॥ पञ्चमीं वामजानौ तु षष्ठीं वै दक्षिणे न्यसेत्॥ सप्तमीं वामकट्यां तु दक्षिणस्यां तथाष्टमीम्॥ ४॥ नवमीं नाभिमध्ये तु दशमीं हृदये तथा॥ एकादशीं वामकुक्षौ द्वादशीं दक्षिणे न्यसेत्॥ ५॥ कण्ठे त्रयोदशीं न्यस्य तथा वक्त्रे चतुर्दशीम्॥ अक्ष्णोः पञ्चदशीञ्चैव विन्यसेन्मूर्ध्नि षोडशीम्॥ ६॥ एवं न्यासविधिं कृत्वा पश्चात्पूजां समारभेत्॥

आचम्य प्राणानायम्य संकल्पः—देशकालौ स्मृत्वा मम आत्मनः श्रुति स्मृति पुराणोक्त १
फल प्राप्त्यर्थं पौरुषेण सूक्तेन षोडशाङ्गन्यासांश्च करिष्ये। सहस्रशीर्षेति षोडशर्चस्य पुरुषसूक्तस्य नारायणऋषिः जगद्बीजं पुरुषो देवता आद्याः पञ्चदशानुष्टुप् अन्त्यायास्त्रिष्टुप् न्यासपूजनहवनाभिषेकेषु विनियोगः।



ॐ सहस्रशीर्षा०	वामकरे।	१
ॐ पुरुषएव०	दक्षिणकरे।	२
ॐ एतावानस्य०	वामपादे।	३
ॐ त्रिपादूर्ध्व०	दक्षिणपादे।	४
ॐ ततोविराट्०	वामजानौ।	५
ॐ तस्माद्यज्ञात्०	दक्षिणजानौ।	६
ॐ तस्माद्यज्ञाद्०	वामकट्याम्।	७
ॐ तस्मादश्वाः०	दक्षिणकट्याम्।	८
ॐ तंयज्ञम्०	नाभौ।	९
ॐ यत्पुरुषम्०	हृदये।	१०
ॐ ब्राह्मणोऽस्य०	वामकुक्षौ।	११
ॐ चन्द्रमामनसः०	दक्षिणकुक्षौ।	१२
ॐ नाभ्या आसीत्०	कण्ठे।	१३
ॐ यत्पुरुषेण०	मुखे।	१४

फल विषये योगियाज्ञवल्क्यः। दद्यात्पुरुषसूक्तेन यः पुष्पा

फल विषये योगियाज्ञवल्क्यः । ऋचात्पुरुषसूक्तेन यः पुष्पाण्यप...
स्याज्जगदिदं तेन सर्वं चराचरम् ॥ १ ॥ पुष्करः प्रतिवेदमहा यागं सूक्तम्पौरुषं स्मृतम् ॥ सर्वकर्मकरं पुण्यं पवित्रम्पापसूदनं ॥ २ ॥ एकैकया ऋचाराम(स्)नातो दत्वाजलाञ्जलीन् ॥ पौरुषेण च सूक्तेन मुच्यते सर्वकिल्बिषात् ॥ ३ ॥ अन्तर्जलगतोजप्त्वा तथा सूक्तं तु पौरुषम् ॥ सर्वकल्मषनिर्मुक्तो यथेष्टां लभते गतिम् ॥ ४ ॥ अकामः पौरुषं सूक्तं जप्त्वा नित्यमतन्द्रितः । नरो याति महाभाग तद्विष्णोः परमम्पदम् इति ॥ ५ ॥

पूजनविधौतु—

आद्ययावाहयेद्देवमृचा तु पुरुषोत्तमम् ॥ द्वितीययासनं दद्यात्पाद्यञ्चैव तृतीयया ॥ १ ॥ अर्घ्यश्चतुर्थ्या दातव्यः पञ्चम्याचमनन्तथा ॥ षष्ठ्या स्नानम्प्रकुर्वीत सप्तम्या वस्त्रधौतकम् ॥ २ ॥ यज्ञोपवीतञ्चाष्टम्या नवम्या गन्धमेव च ॥ पुष्पन्देयन्दशम्या तु एकादश्या च धूपकम् ॥ ३ ॥ द्वादश्या दीपकन्दद्यात् त्रयोदश्या निवेदनम् ॥ चतुर्दश्या नमस्कारम्पञ्चदश्या प्रदक्षिणाः ॥ ४ ॥

ॐ सहस्रशीर्षा०	आवाहनम् ।
ॐ पुरुषएव०	आसनम् ।
ॐ एतावानस्य०	पाद्यम् ।
ॐ त्रिपादूर्ध्व०	अर्घ्यम् ।
ॐ ततोविराट्०	आचमनम् ।



ॐ तस्माद्यज्ञात्०	स्नानम् ।	६
ॐ तस्माद्यज्ञात्०	वस्त्रम् ।	७
ॐ तस्मादश्वाः०	यज्ञोपवीतम् ।	८
ॐ तंयज्ञम्०	गन्धम् ।	९
ॐ यत्पुरुषम्०	पुष्पाणि ।	१०
ॐ ब्राह्मणोऽस्य०	धूपम् ।	११
ॐ चन्द्रमामनसः०	दीपम् ।	१२
ॐ नाभ्याआसीत्०	नैवेद्यम् ।	१३
ॐ यत्पुरुषेण०	नमस्कारम् ।	१४
ॐ सप्तास्य०	प्रदक्षिणाम् ।	१५
ॐ यज्ञेनयज्ञम्०	उद्वासनम् ।	१६



* अथ *

॥ माध्यन्दिनीयम्पुरुषसूक्तम् ॥

हरिः ॐ सहस्रशीर्षा पुरुषः सहस्राक्षः सह-
स्रपात् ॥ स भूमिꣳ सर्व्वतस्पृत्वात्यतिष्ठ
द्दशाङ्गुलम् ॥ १ ॥ पुरुष एवेदꣳ सर्व्वं यद्भूतं
यच्च भाव्यम् ॥ उतामृतत्वस्येशानो यदन्ने
नातिरोहति ॥ २ ॥ एतावानस्य महिमाऽतो

ज्ज्यायाँश्च पूरुषः ॥ पादोऽस्य व्विश्वा भूतानि
त्रिपादस्यामृतन्दिवि ॥ ३ ॥ त्रिपादूर्द्ध्वऽउदै-
त्पुरुषः पादोऽस्येहाऽभवत्पुनः ॥ ततो व्वि-
ष्वङ्व्यक्रामत्साशनानशनेऽअभि ॥ ४ ॥
ततो व्विराडजायत व्विराजो अधिपूरुषः ॥ स
जातोऽअत्यरिच्यत पश्चाद्भूमिमथो पुरः ॥५॥

पशूँस्ताँश्चक्रे वायव्यानारण्याग्राम्याश्च ये ॥
श्री ॥ ६ ॥ तस्माद्यज्ञात्सर्वहुतऽऋचः सामानि
जज्ञिरे ॥ छन्दांꣳसि जज्ञिरे तस्माद्यजुस्त-
स्मादजायत ॥७॥ तस्मादश्वाऽअजायन्त
ये के चोभयादतः ॥ गावोह जज्ञिरे तस्मा-
त्तस्माज्जाताऽअजावयः ॥ ८ ॥ तं यज्ञं
बर्हिषि प्रौक्षन्पुरुषं जातमग्रतः तेन देवा-

ऽअयजन्त साध्याऽऋषयश्च ये ॥९॥ यत्पुरुषं
व्यदधुः कतिधा व्यकल्पयन् ॥ मुखङ्किम-
स्यासीत्किं बाहू किमूरू पादा उच्येते ॥१०॥
ब्राह्मणोऽस्य मुखमासीद्बाहू राजन्यः
कृतः ॥ ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो-
ऽअजायत ॥११॥ चन्द्रमा मनसो जातश्च-
क्षोः सूर्योऽअजायत ॥ श्रोत्राद्वायुश्च प्राणश्च

मुखादग्निरजायत। १२। नाभ्याऽआसीदन्त-
रिक्षं० शीर्ष्णो द्यौः समवर्तत॥ पद्भ्याम्भू-
मिर्दिशः श्रोत्रात्तथा लोकाँ २ ॥ऽअकल्पयन्
॥१३॥ यत्पुरुषेण हविषा देवा यज्ञमतन्वत ॥
वसन्तोस्यासीदाज्ज्यङ्ग्रीष्मऽइध्मः शरद्ध-
विः ॥१४॥ सप्तास्यासन्परिधयस्त्रिः सप्त
समिधः कृताः। देवा यद्यज्ञन्तन्वाना ऽअ-

श्री बध्नन्पुरुषम्पशुम् ॥ १५ ॥ यज्ञेन यज्ञम-
यजन्त देवास्तानि धर्म्माणि प्रथमान्न्यासन् ॥ सू. १०
१० ते ह नाकम्महिमानः सचन्त यत्र पूर्वे सा-
ध्याः सन्ति देवाः ॥ १६ ॥

इति माध्यन्दिनीयम्पुरुषसूक्तम् ।



अथ श्रीसूक्तम् ।

ॐ हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम् ॥

चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥ १

तां म आवह जातवेदो लक्ष्मीमनपगामिनीम् ॥
यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम् ॥ २ ॥
अश्वपूर्वां रथमध्यां हस्तिनादप्रबोधिनीम् ॥
श्रियं देवीमुपह्वये श्रीर्मा देवीर्जुषताम् ॥ ३ ॥ कां
सोस्मितां हिरण्यप्राकारामार्द्रां ज्वलन्तीं तृप्तां

---

१ अथाथर्वलक्ष्मीसूक्तम् । अथर्वणि पाठः क्वचिद्दृश्यते ।

तर्पयन्तीम् ।। पद्मे स्थितां पद्मवर्णां तामिहोप-
ह्वये श्रियम् ।।४।। चन्द्रां प्रभासां यशसा ज्वलन्- सू.
न्तीं श्रियं लोके देवजुष्टामुदाराम् ।। तां पद्मिनी-
मीं शरणमहं प्रपद्येऽलक्ष्मीर्मे नश्यतां त्वां
१२ वृणोमि ।।५।। आदित्यवर्णे तपसोऽधिजातो
वनस्पतिस्तव वृक्षोऽथ बिल्वः ।। तस्य फलानि १२
तपसा नुदन्तु मायान्तरायाश्च बाह्याऽल-

क्ष्मीः ॥६॥ उपैतु मां देवसखः कीर्तिश्च मणिना
श्री सह ॥ प्रादुर्भूतोऽस्मि राष्ट्रेऽस्मिन्कीर्तिमृद्धिं ददातु व
१३ मे ॥७॥ क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीं ना-
शयाम्यहम् ॥ अभूतिमसमृद्धिं च सर्वां निर्णुद
मे गृहात् ॥८॥ गन्धद्वारां दुराधर्षां नित्यपुष्टां १३
करीषिणीम् ईश्वरीं सर्वभूतानां तामिहोपह्वये

श्री श्रियम्॥९॥ मनसः काममाकूतिं वाचः सत्य सू
१४ मशीमहि। पशूनां रूपमन्नस्य मयि श्रीःश्रयतां
यशः॥१०॥ कर्दमेन प्रजा भूतामयि संभव
कर्दम॥ श्रियं वासय मे कुले मातरं पद्ममालि १४
नीम्॥११॥ आपः सृजन्तु स्निग्धानि चिक्लीत
वस मे गृहे। नी च देवीं मातरं श्रियं वासय मे

कुले ॥ १२ ॥ आर्द्रांपुष्करिणींपुष्टिं पिङ्गलां
श्री पद्ममालिनीम् ॥ चन्द्रां हिरण्मयीं लक्ष्मीं १५
१५ जातवेदो म आवह ॥ १३ ॥ आर्द्रां यः करिणीं
यष्टिं सुवर्णां हेममालिनीम् ॥ सूर्यां हिरण्मयीं
लक्ष्मीं जातवेदो ममावह ॥ १४ ॥ तां मऽआ-
वह जातवेदो लक्ष्मीमनपगामिनीम् ॥ यस्यां

श्री हिरण्यं प्रभूतं गावो दास्योऽश्वान्विन्देयं पुरु- सू

१६ षानहम् ॥ १५ ॥ यः शुचिः प्रयतो भूत्वा जुहुया-

दाज्यमन्वहम् ॥ सूक्तं पञ्चदशर्चं च श्रीकामः

सततं जपेत् ॥ १६ ॥

ऋक्शाखीयम् श्रीसूक्त समाप्तम् । १६

नित्यकर्म · विधि

पता· रतनलाल सुरेका, हरदयाल ~~बाबू के~~ सुरेका लेन

सलकिया · हवड़ा

❀ इति माध्यन्दिनीयं ❀

सविधानम्पुरुषसूक्तं श्रीसूक्तञ्च

मिलने का पता—बाबू बैजनाथ प्रसाद बुक्सेलर,
राजादरवाजा बनारस सिटी ।

